# श्री सद्गुरुदशकम्

श्रुतिस्मृतिपुराणोक्त धर्ममार्गरतं गुरुम् ।
भक्तानां हितवक्तारं नमस्ये चित्त शुद्धये ॥ 1

अद्वैतानंदभरितं साधूनां उपकारिणम् ।
सर्वशास्त्रविदं शांतं नमस्ये चित्त शुद्धये ॥ 2

कर्मभक्तिज्ञानमार्गप्रचारे बद्धकंकणम् ।
अनुग्रह प्रदातारं नमस्ये चित्त शुद्धये ॥ 3

भगवत्पाद-पादाब्ज-विनिवेषित-चेतसः ।
श्री चंद्रशेखरगुरोः प्रसादो मयि जायताम् ॥ 4

क्षेत्रतीर्थकथाभिज्ञः सच्चिदानंद विग्रहः ।
चंद्रशेखरवर्यो मे सन्निधत्तां सदाहृदि ॥ 5

पोषणे वेदशास्त्राणां दत्तचित्तमहर्निशम् ।
क्षेत्रयात्रारथं वंदे सद्गुरुं चंद्रशेखरम् ॥ 6

वेदज्ञान् वेदभाष्यज्ञान् कर्तुं यस्य समुद्यमः ।
गुरुर्यस्य महादेवः तं वंदे चंद्रशेखरम् ॥ 7

© 2022 Vedam Nadam

मणिवाचकगोदादि-भक्तिवागमृतैर् भृशम् ।
बालानां भगवद्भक्तिं वर्धयंतं गुरुं भजे ॥ 8

लघूपदेशैः नास्तिक्य भावमर्दन-कोविदम् ।
शिवं! स्मितमुखं! शांतं! प्रणतोस्मि जगद्गुरुम् ॥ 9

विनयेन प्रार्थयेहं विद्यां बोधय मे गुरो ।
मार्गमन्यं न जानेऽहं भवंतं शरणं गतः ॥ 10

॥ श्री श्री श्री विजयेंद्र सरस्वती विरचित सद्गुरुदशकं संपूर्णम् ॥

© 2022 Vedam Nadam